# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय ५९

तपोबलहतान्कृत्वा वासिष्ठान्समहोदयान् ।
ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १॥

अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः ।
धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ।
स्वेनानेन शरीरेण देवलोकजिगीषया ॥ २॥

यथायं स्वशरीरेण देवलोकं गमिष्यति ।
तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह ॥ ३॥

विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ।
ऊचुः समेत्य सहिता धर्मज्ञा धर्मसंहितम् ॥ ४॥

अयं कुशिकदायादो मुनिः परमकोपनः ।
यदाह वचनं सम्यगेतत्कार्यं न संशयः ॥ ५॥

अग्निकल्पो हि भगवाञ्शापं दास्यति रोषितः ।
तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा दिवम् ।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ ६॥

ततः प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठते ॥ ७॥

एवमुक्त्वा महर्षयः सञ्जह्रुस्ताः क्रियास्तदा ।
याजकाश्च महातेजा विश्वामित्रोऽभवत्क्रतौ ॥ ८॥

ऋत्विजश्चानुपूर्व्येण मन्त्रवन्मन्त्रकोविदाः ।
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ॥ ९॥

ततः कालेन महता विश्वामित्रो महातपाः ।
चकारावाहनं तत्र भागार्थं सर्वदेवताः ॥ १०॥

नाभ्यागमंस्तदाहूता भागार्थं सर्वदेवताः ।
ततः क्रोधसमाविष्टो विश्वमित्रो महामुनिः ॥ ११॥

स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् ।
पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर ॥ १२॥

एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ।
दुष्प्रापं स्वशरीरेण दिवं गच्छ नराधिप ॥ १३॥

स्वार्जितं किं चिदप्यस्ति मया हि तपसः फलम् ।
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ॥ १४॥

उक्तवाक्ये मुनौ तस्मिन्सशरीरो नरेश्वरः ।
दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा ॥ १५॥

देवलोकगतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ।
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ॥ १६॥

त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ।
गुरुशापहतो मूढ पत भूमिमवाक्शिराः ॥ १७॥

एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ।
विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् ॥ १८॥

तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ।
रोषमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १९॥

ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ।
सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः ॥ २०॥

नक्षत्रमालामपरामसृजत्क्रोधमूर्छितः ।
दक्षिणां दिशमास्थाय मुनिमध्ये महायशाः ॥ २१॥

सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ।
अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।
दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे ॥ २२॥

ततः परमसम्भ्रान्ताः सर्षिसङ्घाः सुरर्षभाः ।
विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २३॥

अयं राजा महाभाग गुरुशापपरिक्षतः ।
सशरीरो दिवं यातुं नार्हत्येव तपोधन ॥ २४॥

तेषां तद्वचनं श्रुत्वा देवानां मुनिपुङ्गवः ।
अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २५॥

सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ।
आरोहणं प्रतिज्ञाय नानृतं कर्तुमुत्सहे ॥ २६ ॥

सर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः ।
नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २७ ॥

यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ।
मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २८ ॥

एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम् ॥ २९ ॥

एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ।
गगने तान्यनेकानि वैश्वानरपथाद्बहिः ॥ ३० ॥

नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन् ।
अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः ॥ ३१ ॥

विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ।
ऋषिभिश्च महातेजा बाढमित्याह देवताः ॥ ३२ ॥

ततो देवा महात्मानो मुनयश्च तपोधनाः ।
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ३३ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com